## जम्ब्वा वा। (१६५/१५४४)

फले इत्येव। जम्बूशब्दात् फले[1]ऽभिधेये वा अण् प्रत्ययो भवति। [2]अञोऽपवादः। अञाणो विधान–सामर्थ्याल् लुग् न भवति, अञस्तु भवत्येव[3]। [4]जाम्बवानि फलानि, [5]जम्बूनि वा॥

## लुप् च। (१६६/१५४५)

वा इत्येव। जम्ब्वाः फले[6]ऽभिधेये प्रत्ययस्य वा लुप् भवति। युक्तवद्भावे विशेषः। जम्ब्वाः फलम् [7]जम्बूः फलम्, जम्बु फलम्, जाम्बवम् इति वा।

[४८०] लुप्प्रकरणे फलपाकशुषामुपसङ्ख्यानम्। (मा.भा.२.३२७)

व्रीहयः। [8]यवाः। माषाः। मुद्गाः। तिलाः।

[४८१] पुष्पमूलेषु बहुलम्। (म.भा. २.३२७)

मल्लिकायाः पुष्पम् मल्लिका[9]। [10]नवमल्लिका जातिः। बिदार्याः मूलं बिदारी। अंशुमती। बृहती। न च भवति। पाटलानि पुष्पाणि। शाल्वानि मूलानि। बहुलवचनात् क्वचि[11]दन्यदपि भवति, [12]कदम्बं पुष्पम्, [13]अशोकम्. [14]करवीरम्, [15]बैल्वानि फलानि इति॥

## हरीतक्यादिभ्यश्च। (१६७/१५४६)

हरीतकी इत्येवमादिभ्यः शब्देभ्यः फले प्रत्ययस्य लुब् भवति। लुकि प्राप्ते लुपो [16]विधाने युक्तवद्भावे स्त्रीप्रत्ययश्रवणे च विशेषः। हरीतक्याः फलं हरीतकी। कोशातकी। नखरजनी। [17]अत्र च व्यक्तिर्युक्तवद्भावेनेष्यते, वचनं त्वभिधेयवदेव भवति। हरीतक्याः फलानि हरीतक्यः।

हरीतकी। कोशातकी। [18]नखरजनी। शष्कण्डी। दाडी। दोडी। [19]दीडी। [20]श्वेतपाकी। अर्जुनपाकी। [21]काला। द्राक्षा। ध्वाङ्क्षा। गर्गरिका। [22]कण्टकारिका। शेफालिका। [23]येषां च फलपाकनिमित्तः शोषः। पुष्पमुलेषु बहुलम्। हरीतक्यादिः॥

## कंसीयपरशव्ययोर्यञञौ लुक् च। (१६८/१५४७)

'प्राक् क्रीताच्छः' (५.१.१/१६६१), कंसीयः। उगवादिभ्यो यत्' (५.१.२/१६६२), [24]परशव्यः। कंसीयपरशव्यशब्दाभ्यां यथासङ्ख्यं यञञौ प्रत्ययौ भवतः तस्य विकारः इत्येतस्मिन् [25]विषये, तत्संनियोगेन [26]च

---

1. विषये ब. 2. ओरञः ड. 3. एव नास्ति फ. 4. जम्बोः फलानि फ. 5. जम्बूनि फलानि ह. 6. अभिधेये नास्ति ब. क. इ. 7. लुपि प्रकृतिवल्लिङ्गेन जम्बूः क. 8. यवानां फलानि यवाः क. 9. पुष्पम् इत्यधिकम् फ. 10. नवमालिका ब. क. ड. इ. फ. 11. अन्यत्रापि क. 12. कादम्बं क. ड. 13. आशोकं क. ड. 14. कारवीरं क. ड. 15. वैणवानि ड. फ. ह. 16. अर्थे ह, वचनं ब, विधानं क.इ.ह. 17. अत्र – हरीतक्यः नास्ति ब. 18. नास्ति फ. 19. दडि ड, शोकि दधि वाकी इत्यधिकम् ह. 20. शाकमिदं इत्यधिकम् फ, शाकण्डी क.इ, शष्कुलीः जातिः ह, शतपाकी ड. 21. शूला ह, कला इ. 22. कण्टका क्षारा ह, कण्डकारिका इ. 23. येषां–बहुलम् नास्ति अ. ग. ई. 24. पारशव्यम् फ, पारिशनः क. 25. अर्थे ह. 26. च नास्ति ब.